Title :
Letters Of Prof Satya Vrat Shastri - Satya Vrat Shastri Collections



शुभाशंसैकादशी

मानसाख्यं महाकाव्यं श्रीनारायणकाङ्करैः ।
सरस्वत्यास्तत्त्वभूतैः रचितं सुमनोहरम् ॥१॥
सुमनोहरणं पाठं पाठं तृप्तिर्नैव [illegible] मे हृदि ।
वैलक्षण्यं किमप्यस्य यद्धि वाचामगोचरम् ॥२॥
नानाऽत्र विजयाः स्पृष्टा अस्पृष्याः पूर्वसूरिभिः ।
भूतानां भूतये ये स्युः ज्ञान-संवर्धनाय च ॥३॥



शुभाशंसा [illegible]

त्रिवेणीति समाख्यातं [illegible] सुधीवरैः ।
महेश्वर[illegible]भिख्यैः रचितं सुमनोहरम् ॥१॥
अलङ्कारैरनुप्रासयमकश्लेषोपमादिभिः ।
अलङ्कृतं, गुणौघैश्च प्रसादादिभिरुज्ज्वलम् ॥२॥ [illegible] दृष्टान्तादिभिरलङ्कृतौ
पाठं पाठं न मे तृप्तिर्जायते सुमनोहरम् ।

सी-248, डिफेंस कालोनी,
नई दिल्ली-110024
26.04.2018

दूरभाषसंख्या
24336631
24336644

मान्या महाभागाः

सस्नेहं प्रणतयः।

वैदेशिकाटनं नाम भवद्भी रचितं शुभम्।
काव्यरत्नं समासाद्य प्रमोदः परमो मम॥1
नानावृत्तैर्निबद्धं सन्मनोमोहकमुत्तमम्।
नानादेशाटनख्यातं नानावृत्तसमाकुलम्॥2
पाठं पाठं काव्यमेतन्नैव तृप्यति मे मनः।
यात्रावृत्तान्तकाव्येषु काव्यमेतन्नृपायते॥3
नव्या भव्या च शैल्यत्र भवद्भिः समुपाश्रिता।
अत्र काव्ये तदन्येष्ववधारणीयो विशेषेण -
रूप हो! ॥4
वैदर्भी रीतिसन्दर्भे कालिदासो विशिष्यते।
भवतामपि काव्येऽस्मिन् नूनं ...

anaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaa

नाना ग्रन्थ प्रणेतारो नाना देशाधिकारिणोऽनुकाः ।
नानाविधानि चित्ति निबन्धास्तः शास्त्र-परिशीलन-
चुञ्चवः ॥ ६ ॥

सौम्याकाराः सौम्यवाचो गुणगृह्या विपश्चितः ।
सदा सदानन्दकराः कुन्दशुभ्रयशोऽभूत् ॥ ७ ॥

गुरुजनेषु सुशीलास्त्वं गुणवान् वाग्देवतायतनः ।
'हरिदत्त' इति ख्याता राजमाना महीतले ।
सम्पन्नां गैर्वाणीवाङ्मयं निजपाण्डित्यैः प्रतिमास्थिताः ॥
हृत्वाश्री पं सम्पुज्य मनवः गुणगणैर्हितः । ... ॥ ८ ॥ (वा
लक्ष्यप्रतो यं 'देवलोके' वाचं ...

प्र.मु./SPP/HYD - 2015 पोस्ट कार्ड POST CARD

PROF. HARIDUTT SHARMA
D-23, EKATA VIHAR,
AUCKLAND ROAD.
ALLAHABAD

पिन PIN 2 1 1 0 0 1

(U.P.)

इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

भारत INDIA 50
महात्मा गांधी MAHATMA GANDHI

Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan

सी - 248, डिफेंस कालोनी,
नई दिल्ली - 110024.
24. 11. 2018

मान्येषु प्रणतयः।

दीपावलि शुभाशंसा भवद्भिः प्रेषिता मयि।
प्रसन्नतानन्दसन्दोहं मम चित्ते समजीजनत् ॥१॥

प्रकाशपर्व तनुतात्
प्रकाशं जगतीतले।
ज्योतिर्येन ~~मो~~ सघना
मोहान्धतमसच्छटाः ॥२॥

सौहृद्यं सौमनस्यं
सर्वभूतदया तथा।
पदं दधतु दृढं लोके
शान्तिर्येन विराजताम् ॥३॥

सौम्येन चक्षुषा नित्यं
ईक्षाम-त्वन्योन्यमितरेतरम्।

anaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaa

प्रत्यहं कार्यमे प्रह्वः
शङ्करं लोकशङ्करम् ॥४॥
मोदन्तां कुशलमेधन्तां
सकुटुम्बकाः सबान्धवाः।
दीर्घमायुरमन्तां च
सौभाग्यादिविवर्जिताः ॥५॥
देववाणीं सेवमानाः
प्रहृष्टा मानवर्जिताः।
इत्येवोक्त्वा समाप्तेन हे वागुणार्णैः सतामल
वाचं विरम् मामहम् ॥६॥ भवदीय स्नेहाधः
भवतां कवि- धुर्याणां
सत्यव्रतः शास्त्री

प्र.मु./SPP/HYD - 2015 पोस्ट कार्ड POST CARD

डॉ० नारायणशास्त्री कांकर
विद्या-वन-भवन
१, कमल विहार, जगतपुरा
जयपुर JAIPUR
(राजस्थान)

पिन PIN 3 0 2 0 1 7

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau



anaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaa

भावाञ्जलिः श्रीप्रारस् महाभागेभ्यः समर्प्यते

प्रभोः स्वकीयं स्थलमित्युदारं
शुभ्रं यशोऽनन्यतमं दधानः।
नानानदीप्रस्रवणैः सुरम्यो
विभाति देशो भुवि केरलाख्यः॥१॥

प्रकृष्टपक्वं बहु यत्र सस्यं
रम्यास्तथा शाद्वलभूमिभागाः।
मन्दं प्रवान्तश्च यदीयवाता
आगन्तुकानां रमयन्ति चेतः॥२॥

प्रक्षालितोऽम्भोनिधिवीचिजालै-
र्नैत्यक्रियासेचनकोऽतिहृद्यः।
विपश्चिदग्र्याध्युषितो महान् मे।
चेतोऽहरद् देशविशेष एषः॥३॥

सत्यव्रतशास्त्रिणः

नवदिल्ली
14.05.2020

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

arsu saketh @ yahoo.com

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

शुभाशंसैकादशी

मानसाख्यं महाकाव्यं श्रीनारायणकाङ्करैः ।
सरस्वत्यास्तत्त्वभूतं रचितं सुमनोहरम् ॥१॥
सुमनोहरणं पाठं पाठं तृप्ति [illegible] मे हृदि ।
वैलक्षण्यं किमप्यस्य यद्धि वाचामगोचरम् ॥२॥
नानाऽत्र विषयाः स्पृष्टा अस्पृष्टाः पूर्वसूरिभिः ।
भूतानां भूतये ये स्यु-र्ज्ञान-संवर्धनाय च ॥३॥
रम्योऽस्ति पदबन्धोऽत्र रम्या शैली च प्रोदहा ।
रम्यश्च वर्ण्यो विषयः सर्वं रम्यमिहास्त्यहो ! ॥४॥
अर्थस्य रमणीयस्य यो भवेत् प्रतिपादकः ।
तं शब्दं काव्यशास्त्रज्ञाः काव्यं श्रेष्ठं प्रचक्षते ॥५॥
तदेतच्छ्रेष्ठ-काव्यस्य प्रणेतारः सुधीभुजाः ।
हंसायन्ते कविश्रेष्ठा विद्वन्मानस-मानसे ॥६॥
सर्गबन्धो महाकाव्य-मेतत् काव्यस्य लक्षणम् ।
अष्टसर्गान्तरत्वं च सरसत्वमथापि च ॥७॥
तदेतत् सर्वथा काव्ये कविभिः परिपालितम् ।
सर्गपञ्चदशी रम्या सुतरामत्र राजते ॥८॥
नानावृत्तमयो बन्धो नानावृत्तावबोधकः ।
वृत्तानां लोकयात्रायां सद्वृत्त-प्रतिपादकः ॥९॥
काव्येऽत्र दृश्यते हारि वृत्तं येन हितं चक्रुवान् ।
वर्धयन्नाशिषा विज्ञान्- श्रीनारायणशास्त्रिणः ॥१०॥
आकृष्ट-स्तद्-गुण-ग्रामै- र्गुणिनां समुपासकः ।
शास्त्री सत्यव्रताख्योऽहं वाचं स्वामुपसंहरे ॥११॥

[illegible]
जयपुरे

दिनाङ्क. ०२६. ०४ २०[illegible]

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

राष्ट्रीय पाण्डुलिपि मिशन

॥ विज्ञानमुपास्व ॥

National Mission for Manuscripts

National Mission for Manuscripts

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ

२०१९

सम्मान्याः विद्वांसः

डो. सत्यव्रत शास्त्रिणः, मान्या ऊषादेवी च,

नमो नमः ॥

सत्कर्मसंस्कृतानि

सद्भावसेवितानि;

वर्षाभिनन्दनानि ॥

चन्द्रिकावासुदेवौ

/

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

ॐ

POST CARD पोस्ट कार्ड

प्र.बु./BPP/HYD - 2015

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

50

मान्या:

डो. सत्यव्रत शास्त्रीजी.

C-૨૫૪

डीफेन्स कॉलोनी

नई दिल्ही.

पिन PIN 1 1 0 0

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें) Do not write or print below this

डो. वासुदेव पाठक 'वागर्थ'

सरस्वतीनगर

अहमदाबाद - 380015

079 26745754

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

3377 / 27-10-2019

विद्या—वैभव—भवन
29—केसर—विहार
जगतपुरा, जयपुर-302017 (राज.)

महामहनीय-मान्या
अयि सुधीन्द्र-श्रीसत्यव्रत-शास्त्रिणः!
श्रीयुत-पादपद्मयोः
प्रणमामि पौनः पुन्येन सविनयं हि ॥

विश्वसिमि सपरिवाराः-
तत्र भवन्तो भवन्तः सर्वेऽपि ।
सन्ति कुशलिन एवात्र
परम-पितृ-परमात्मनोऽनुकम्पया ॥

पूज्य-मातृ-द्वयोः-
श्चापि कृपया विनिर्भया नीतिततिर्मे ।
प्रतिवर्षमिव सोऽयमपि
दीपोत्सवो भवतु भवद्भ्योऽभीष्टदः ॥

शरीरे स्वास्थ्यं मनसि
प्रसन्नता च सदैव वर्धिष्यतां वै ।
हृदयेन मातृ-लक्ष्मीं
पुनः पुनः प्रणिपत्य याचे भवद्भ्यः ॥

Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan

संस्कृतायोग-परिणति-
रथ या सर्वकाराय ह्त्ताऽद्युना।
कुतः सा प्राप्तव्याऽसि?
कृपयेदमपि सूच्यतां तावद् मह्यम्॥

अनत्रिंशे केसर-
विहारे जगत्पुरे जयपुरे वासी।
अयमद्य मासिके भवदीय-
शुभाशी:- सनीप्रभु-नागेन्द्रकुमार:

२७/१०/२०१९/
दीपावली-दर्शने

प्र.मु./SPP/HYD - 2012 पोस्ट कार्ड POST CARD

मे॰ प॰ राष्ट्रपति-सम्मानित,
पद्मभूषण-डॉ॰ श्रीयुत-
सत्यव्रतशास्त्रि-चरणाः
सी-२४८, डिफेंस कॉलोनी
नई दिल्ली

पिन PIN 110024

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

Mob: 09650177463

anaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaa

डा० नारायणशास्त्रिकाङ्करे महो— 29.11.2019 दिने
प्रेषितं पत्रम्

— · —

मान्या विद्वद्वर्याः
सप्रणामं प्रणति तावकः।

दिनानि नाना विगतानि पत्रं
प्राप्तं मम प्राप्तवतस्त्वयापि।
तदुत्तरं प्रैषि मयेति नेत्थं
सद्भिः कृतागा अपि मर्षणीयः॥१॥

क्षमाधनाः साधुजनाः कदापि
क्षमास्वभावं न परित्यजन्ति।
जने कृतागस्यपि, तेन
सतः क्षमां याचितुमुद्यतोऽहम्॥२॥

अनेककार्याकुलितान्तरङ्गः
क्षणं न विन्दन् क्षणमप्यहं भोः।
अतश्च कृत्येऽपि न कार्यजाते
दातुं मनः स्वं खलु पारयामि॥३॥

कायेन जीर्णो वयसा च वृद्धो
ग्रस्तश्च रोगैर्बहुभिः प्रवृद्धैः।
कष्टाश्रितोऽहं व्यतियापयामि
यथा कथञ्चित् समयं स्वकीयम्॥४॥

सरस्वतीपादयुगाब्जभृङ्गः -
सदा तदाराधनतत्परोऽहम्।
कष्टानि सोढ्वाऽपि शरीरजानि
मनःप्रसादं विसृजामि नैव॥५॥

ग्रन्था अनेके मयका प्रणीता
गतेषु वर्षेष्विति मेऽस्ति तोषः।
एष एव तोषः परमं धनं मे
तेनैव धन्यं कलयाम्यहं स्वम्॥६॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

इत्येव विद्याविभवेषु सत्सु
वृत्तां स्वकीयं विनिवेद्य नम्रः।
शिवं शिवानीं च शिवं च नित्यं
सम्प्रार्थयेऽहं भवदेकचित्तः॥६॥

अहमदाबादनगरस्थेभ्यो वासुदेवत्रिपाठिभ्यः २३.११.२०१८ दिने प्रेषितं पत्रम्

मान्या विद्वद्वरेण्याः
सप्रणयं प्रणतिततयः।

नूतनवर्षशुभाशंसा भवद्भिः प्रेषिताः प्रियाः।
प्रमन्दानन्दसन्दोहं मम चेतस्यजीजनन्॥१॥

वाणीवलीपुरगता विबुधा भवन्तो
दिल्लीपुराधिवसतिश्च भवत्प्रियोऽहम्।
स्नेहस्तथाऽपि हृदयद्वयभावको यो
बध्नाति तं प्रति स्य महिमाऽस्ति गिरामगम्यः॥२॥

नूतनवर्षं शुभं भूयाद् वृद्धिसिद्धिसुखप्रदम्।
भवतामिति सम्प्रार्थये वाचं स्वामुपसंहरे॥

विद्वद्विधेयोऽहं
सत्यव्रतः शास्त्री

The bow from which he shot the arrow was made of a rabbit's horn, its string was made of a tortoise's moustache while the arrows made of a special kind of reed. Due to the impact of the arrow Kokkhanak

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

विद्या—वैभव—भवन
29—केसर—विहार
जयतपुरा, जयपुर-302017 (राज.)

७३२३
३-११-२०१९

दीपावली-महोत्सव,
सर्व सिध्यतु तत्र भवते भवते।
सकुटुम्बाय मोदक:,
कामये तदिदं मान्या:! सन्मनम् ॥१॥

शारीरं मानसं च,
पुन: स्वास्थ्यं तिष्ठतु सारोग्यकम्।
यश: प्रतिष्ठा मान:,
प्राप्योत सकलमेतत् सततमेव ॥२॥

समृद्धिर्भवतु बहुला,
महार्घता नहि कदापि प्रबाधताम्।
लगतु मनो महेश्वरे,
परोपकारे च रति: प्रवर्द्धताम् ॥३॥

ऊनत्रिंशे केसर-,
विहारे विद्या-वैभव-भवनेऽत्र।
जगत्पुराख्य-जयपुरे,
वासी कोविद-कुल-किङ्कर: ॥४॥

Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan

अयमहमस्मि विनीतो,
भवदीय-शुभाशी-राशि-समीप्सुः।
हार्दं स्वमुपसंहरन्,
प्रणमन् [illegible] ॥५॥

प्र.मु./SPP/HYD - 2012 पोस्ट कार्ड POST CARD

सेवायां —
परम-पूजनीय डॉक्टर
प्रो. श्रीसत्यव्रतशास्त्री जी
(पद्मभूषण, राष्ट्रपति-सम्मानित मनीषी)
सी-248,
डिफेन्स कॉलोनी
नई दिल्ली-
110024

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

anaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaa

॥ श्रीः ॥

अयि परम-आदेया, महामहिम-राष्ट्रपति-सम्मानिताः।
पद्मश्री-विभूषिताः, सत्यव्रतशास्त्रिपादाः! प्रणमामि ॥१॥
सपरिवारा भवन्तो, मन्ये सर्वथा सकुशलाः स्वस्थाः।
सारस्वत-कोषमथ च, स्वामूल्य-कृतिभिः पूरयन्तः स्युः ॥२॥
एकोनविंशत्युत्तर-द्वि-विंशतितम एष विश्व-मानितः।
खैस्ताब्दः करोत्वनिशं मिह भवतामपि सकुटुम्बानां शम् ॥३॥
पूज्य-पाद-चरणेभ्यः, सादरमस्मदीय-नतयो विनिवेद्याः।
भवदीय-शुभाशिषस्तु, सततं हि सत्य-मनसा कामयामहे ॥४॥
वाञ्छा या विगताब्दे, नैव सिद्धाः केनापि हेतुनाऽत्र।
अस्मिन् नूतनेऽब्दे तु, सिद्ध्यन्तु ता भगवत्-कृपया ॥५॥
स्वास्थ्यं तिष्ठतु सम्यक्, सदा मनसि प्रसादः समुल्लसतात्।
परोपकार-वृत्तिश्च, नहि कदापि ह्रसतात् सुखशान्तिदा ॥६॥
उदेतु मनसि सद्भाव, उपकारेषु येन प्रवर्त्तेत नित्यम्।
मिलेन्न येन दुराशीः, दीन-दुःखि-जनस्य हृदयतो निःसृता ॥७॥
परमपितृ-परमेश्वरे, शुक्लेन्दुरिव रागोऽत्र विवर्द्धताम्।
सद्वृत्तिर्न्यूनाऽस्तु न, प्रतिपदं तदासीत्त्वमनुभूयेत ॥८॥
धनागमो भवतु नाम, यथात्र महार्घता प्रबाधनो नहि।
भ्रष्टाचार-मूलं तु, वरीवर्त्ति सैव महार्घता ॥९॥
मनोदुष्ट्यैव लोकाः, प्रवर्त्तन्ते नाना भ्रष्टाचारेषु।
मनसः शोधकमेकं, संस्कृतमेव वरीवर्त्ति केवलम् ॥१०॥
शिक्षित-संस्कृतो जनो, न भ्रष्टाचारी न चोतङ्कुरुते।
दृष्टः श्रुतो दण्डितो वा कुत्रापि केनापि कदापि स न ॥११॥
किन्त्वनिवार्य-रूपेण, संस्कृतं नहि शिक्ष्यते सर्वकारेण।
हा हन्त! सर्वकारे, सद्बुद्धिः कदा समुदेष्यति गुरुदेव! ॥१२॥
पुनः पुनश्चेतितोऽपि, यदि सर्वकारः स्वं नहि सम्भालयति।
नहि तत्कृत-दोषजो, दण्डः किं न सर्वैरुपभोक्तव्योऽस्ति? ॥१३॥
सर्वकाराय वितरतु, सद्बुद्धिं परमपिता परमात्मा।
सदैवात्र जनतायाः, सर्वविधं कल्याणं सिद्धं स्यात् ॥१४॥
प्रणष्टं विचिन्त्यं नहि, वर्त्तमान-संरक्षणे देयं ध्यानम्।
वर्त्तमानममूल्य-जीवनं विनाश्यम्? ॥१५॥
भविष्य-विचिन्तने किं, यदि जायेत किं न तर्हि वाञ्छिते।
जने जने भावनेयमिह एनाऽस्माऽविलम्बितम् ॥१६॥
लभ्येतां सुख-शान्ती, पृच्छ्यतां स्वीय
सर्वेषु स्वमवास्थितं, मित्र यथानु बोभवीतात् मनुष्यः।
तर्ह्यपि किं तस्मै भोः!, सुखं शान्तिर्न मेलिष्यते? ॥१७॥
किन्तु क इदमनुभवितुं, प्रयत्नं करोति मनुष्योऽत्र?।
अत एव सुख-शान्तिके, सदा स तिष्ठति वञ्चितो जीवने ॥१८॥
सेयं स्थितिरस्माकं, यथा नहि स्यात् तथा प्रयतनीयम्।
इत्येवास्मान् सम्प्रति, शिक्षयितुमागतोऽयं नववर्षः ॥१९॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

7336

250 भारत INDIA
INDIRA GANDHI

सेवा में -
डॉ० श्री सत्यव्रत शास्त्री जी
C-248 डिफेंस कालोनी
नई दिल्ली - 110024

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line) ____ पिन PIN

दूसरा मोड़ SECOND FOLD

इस पत्र के अन्दर कुछ न रखें NO ENCLOSURES ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—
नारायण काङ्कर
विद्यावैभव भवन,
29 केसर विहार,
पिन PIN
जगतपुरी, जयपुर - 302017 (राज०)

यहाँ काट कर खोलिए TO OPEN CUT HERE

PHILATELY: KING OF HOBBIES
CONTACT:
Nearest Philatelic Bureau
COLLECT
INDIA POSTAGE STAMPS

यहाँ काट कर खोलिए TO OPEN CUT HERE

मु./S.P.P.HYD. - 2010

ऊनत्रिंशे केसर-, विहारे विद्या-वैभव-भवनेऽत्र।
जगत्पुराख्य-जयपुरे, वासी कोविद-कुल-किङ्करः ॥२०॥
एवं सकुटुम्बेभ्यो, भवद्भ्योऽपि नव-ख्रैस्त-वर्षाहै।
सप्रणति शुभं विनिवेद्य, किरति नारायणकाङ्करः ॥२१॥

१-१-२०१९

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

योगवासिष्ठमाख्यातः सर्वदृष्ट्या विवेचकः।
ग्रन्थः सूक्ष्मो मया यत्नाद्विनोदाय विचारितम्॥१॥
पठित्वा ग्रन्थमेतं मे सन्तोषो यदि सम्भवेत्।
काव्यामृतरसास्वादं यत्नः स्यान्मे फलग्राहिः॥२॥
यत्नः फलेन संयोज्य इति मान्यैः कृतं वचः।
तस्य सत्यत्वविषये न सन्देहोऽस्ति कदाचन॥३॥
नानावर्णिते ग्रन्थेऽत्र परिश्रान्तं मयाऽनिशम्।
तत्रैव फलमेतद्धि सद्ग्रन्थोऽयं विनिर्मितः॥४॥
गृहाण पाठको मया ग्रन्थः स्वज्ञानव्याप्तिसाधितः।
ये मनसि सन्तोषं प्रसञ्जीजनत्॥५॥
नास्ति लोके धनं सादृश्यं सन्तोषेण समं भवेत्।
यदि त्वेव मम विश्वासः सतां दृढतरो मम॥६॥

यावज्जीवं मया ग्रन्थः शास्त्रीयः परिशीलितः।
स एवास्ति विनोदो मे तत्रैव रमणं मम॥१॥
लोकचिन्ताविरहितो रहितोऽखिलकल्मषैः।
नामैः पुण्यात्मभिः स्वां सङ्गतिं यामि मेऽनिशम्॥२॥
नास्ति पुण्यतरं धर्म सत्सङ्गादिति निश्चितम्।
सङ्गः सद्भिः सतां तस्मात्तु तरं स्वादितो बोधः॥३॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

प्रतिलिपि
दिनाङ्कः 17.05.2018

सी-248, डिफैंस कालोनी,
नई दिल्ली-110024.
26.04.2018

मान्या महाकवयः,

सस्नेहं प्रणामाः।

वैदेशिकाटनं नाम भवद्भी रचितं शुभम्।
काव्यरत्नं समास्वाद्य प्रमोदः परमो मम ॥१॥
नानावृत्तैर्निबद्धं सन्नानावृत्तावबोधकम्।
विदेशयात्राकाव्येषु काव्यमेतदनूपमायते ॥२॥
नानाग्रन्थप्रणेतारो नानाशास्त्रविचक्षणाः।
कृतनानादेशाटना नानाविद्वद्भिरादृताः ॥३॥
न सन्ति बहवो लोके भवादृशा बुधोत्तमाः।
नालिदेयां प्रशङ्काये जरामरणजं भयम् ॥४॥
प्रमन्देनाभिधेयेन श्रुतेन बहुना तथा।
संस्कृतं वाङ्मयं सर्वमविकालेन बृंहितम् ॥५॥
एवमेवोपबृंहयन्त्वाभिः कृतिभिर्बुधाः।
इत्येव प्रार्थये प्रभुः शङ्करं लोकशङ्करम् ॥६॥

एतादृत्य

वैदर्भीरीतिसन्दर्भे कालिदासो निरीक्ष्यते।
भवत्स्वपि काव्येषु रीतिः स्वीयैवविश्रुता ॥७॥
तेनास्ति रसनिष्यन्दस्तेषु कोऽपि विलक्षणः।
ग्राम्यवर्जितपदलालित्यं गुणगुम्फनमप्यहो ॥८॥
ईशं याचेयं भवतां यशोऽस्तु पृथिवीतले।
स्वास्थ्यं च दीर्घमायुश्च सौख्यं चापि निरन्तरम् ॥९॥
धनधान्यसमृद्धिश्च सौमनस्यं च बन्धुषु।
इति सम्प्रार्थये लोकेशं वाचं स्वानुभवं हरे ॥१०॥

भवद्गुणगणावर्जितहृदयोऽहं
सत्यव्रतः शास्त्री

आचार्यहरिदत्तशर्माणः

दिनाङ्कः

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

सत्यव्रत-श्रीयुत-शास्त्रिपादा, दीपावली-पावन-पर्वणीह।
शुभाशिषोऽर्थी विनतः सदाऽहं, पादाब्ज-युग्मं भवतां प्रणौमि ॥१॥
प्रणौमि नित्यं च दयामयीं माम्, उषां मदीयां विदुषीं सुहासाम्।
वात्सल्यमूर्तिर्मयि सेयमास्ते, शुभाशिषो वर्षतु भूरि भूरि ॥२॥
दीपावली-पावन-पर्व मान्या!, लक्ष्मी-कृपातः शुभदं सदाऽस्तु।
स्वास्थ्यं समृद्धिर्मिलतात् प्रकामम्, आयुस्त्वमाप्नोत सुदीर्घमेव ॥३॥
महार्घतातो मिलताद् विमुक्तिर्, न कोऽपि कश्चित् तुदतात् कदापि।
जीवन् ससौहार्दमयं नृलोके, आतङ्कवादं त्यजताद्धि सर्वः ॥४॥
आतङ्क एषोऽस्ति न शान्तिदायी, सुखं जनानां हरते स सद्यः।
निर्दोष-हत्या-जनितश्च दोषो, लोकद्वयं नाशयते सदैव ॥५॥
आतङ्कमूलं मनसः प्रदुष्टिः, शुद्ध्येन्मनः केवल-संस्कृतेन।
प्रशासनं संस्कृत-शिक्षणे हा!, हन्ते सभेभ्योऽप्यनिवार्यतो न ॥६॥
हा! पण्डिताश्चापि प्रशासनं न, बोध्यं प्रकुर्वन्ति तथा विधातुम्।
तेनैव सर्वत्र मनः-प्रदुष्टिर्, नाना-दुराचारमिह प्रसूते ॥७॥
आस्तां यदेतद् भवतीह तत्तु, वैवश्यमेतत् किं नहि सह्यमस्ति?।
अस्योपचारो नहि दृश्यतेऽन्यः, प्रचारतः संस्कृत-वाङ्मयस्य ॥८॥
स्वकीय-दन्ता हि दशन्ति जिह्वां, दोषः परस्मै कथमस्य देयः?।
भोग्यं तु तत्सर्वमिहास्ति नूनं, शुभाऽशुभं यत्कृतमात्मनाऽत्र ॥९॥
प्राप्ते प्रसङ्गे स्वजनेषु मान्या!, भवत्सु हार्दः प्रकटीकृतः स्वः।
पीडाऽस्ति काचिद् भवतामनेन, याचे क्षमां तद् हृदयेन भूरि ॥१०॥
प्रेम्णः प्रदीपो ज्वलतात् सदैव, निर्वाणमायातु न जातु कस्य।
आरोग्य-दीर्घायुरवाप्य सर्वः, सुखी समृद्धो भवतात् सदैव ॥११॥

फलेच्च पुष्येत् सकलोऽपि लोको, यच्चापि लिप्सेत सविन्दतां वै।
इत्येव याचे हृदयेन लक्ष्मीं, विष्णुप्रियां मां करुणानिधिं भोः! ॥१२॥

जनोऽस्मि देशे केसर-बिहारे, विद्यावैभव-भवनेऽत्र।
जगत्पुरस्थ्य-जयपुरे, वासी कोविद-कुल-किङ्करः ॥१३॥
निवेद्यैवं स्वहार्दं, सानुकम्पितं भवत्सु सुधीवरेषु।
विरमयति स्वलेखनीं, प्रणमन् कोविदकिङ्करः ॥१४॥

३०।१०।२०१६

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

सेवा में :
श्रीयुत परमादरणीय
प्रो० सत्यव्रत शास्त्रीजी
सी-248 डिफैंस कालोनी
नई दिल्ली

न तो लिखें और न ही मुद्रित करें Do not write or print below this line पिन PIN 110024

दूसरा मोड़ SECOND FOLD

इस पत्र के अन्दर कुछ न रखें NO ENCLOSURES ALLOWED
पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS
प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—
नारायण काङ्कर
विद्या-वैभव-भवन
... -विहार
जगतपुरा, जयपुर-3020.. (राज.)
पिन PIN

PHILATELY: KING OF HOBBIES
CONTACT:
Nearest Philatelic Bureau
COLLECT
INDIA POSTAGE STAMPS

यहाँ काट कर खोलिए TO OPEN CUT HERE

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

विद्या—वैभव—भवन
29-केसर-बिहार
जगतपुरा, जयपुर-302017 (राज.)

॥ श्रीः ॥

(१)

पद्म-भूषण-भूषिताः, समादृताः परमश्रद्धेयाः सुधियः ।
नमांसि भवद्भ्य आर्याः, डाक्टर-श्रीसत्यव्रतशास्त्रिणे मे ॥

(२)

आशासे परिवारे, कुशलमेव वर्त्तते सर्व-प्रकारकम् ।
पूज्या मे मातरोऽपि, सर्वथा स्वस्थतमा एव मोदन्ते ॥

(३)

अत्रापि कुशलं, किन्तु, पत्नी-परलोक-प्रयाणेन स्वयम् ।
शिथिल-शिथिलमिव सत्त्व-मनुबोभवीमि सकुटुम्बः ॥

(४)

तद्-देहोऽत्र मेडिकल-कालेजे दत्तः शिक्षार्थ्युपयोगाय ।
ममापि देहं, तथैव, दातुमादिष्टवानस्मि स्वकुटुम्बम् ॥

(५)

सा त्वासीद् मम परमा, शक्तिरर्धाङ्गिनी गृहलक्ष्मीर्धन्या ।
तस्यां विन्यस्त-भार, एवाहमियानभूवं किञ्चिज्ज्ञ इह ॥

(६)

परं हा! सम्प्रति नु मां, समय एव बलवान् कुर्वीत सक्रियम् ।
निराशमेवान्यथा तु, मन्मन्ये शरीरेण मनसा च स्वम् ॥

(७)

सत्यं लिखामि साऽऽसीत्, सहयोगिनी मे सदोद्यता ।
रुग्णावस्थायामपि, सा मां निःस्वार्थमसेवत मातेव ॥

(८)

किन्तु हा हन्त! सम्प्रति, तत्सेवातो वञ्चितोऽस्मि हतभाग्यः ।
सत्यमेव विधुरताऽत्र, साक्षादनुभावयति पत्नी-महत्ताम् ॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

(९)

गृहं नु गृहिणी-हीनं, श्मशानमिवानुभूयते शून्य-शून्यम्।
विधुर-स्थितिरियं यदा, नदेतोऽति विधवा-स्थितिस्तद्-वैधैव॥

(१०)

एक-चक्रे निर्गते, किमुपयोगार्हा तिष्ठति द्विचक्रिका ?
सेयमेव स्थितिरस्ति, दम्पत्योरेकस्मिन् मृते शिष्टस्य ॥

(११)

अस्तु तावत्, संस्कृत-योग-प्रश्नोत्तराणि प्रेषयामि समम्।
सारं सारं स्वेष्टं, गृह्णान्त्वितस्तु यथा हंसः पयोऽम्भसः॥

(१२)

पुनश्च सर्वकाराय, यत् प्रतिवेदनं प्रदास्यते भवद्भिः।
उत्तर-दातृभ्योऽपि च, तत्प्रति-दानाय वाच्यः सर्वकारः॥

(१३)

प्रश्नोत्तर-प्रेषणेऽथ, विलम्बो यः कोऽप्यभूद् विवशतया।
क्षमन्तां तं नु कृपया, क्षमैक-द्रविणा हि साधवो विश्रुताः॥

(१४-१५)

ऊनत्रिंशे केसर-, विहारे विद्या-वैभव-भवनेऽत्र।
जगत्पुराख्य-जयपुरे, वासी भवदीय-कृपेच्छुकः॥
इति सविनयं स्व-हार्दं, भवदीय-श्रीपाद-पद्म-युग्मे।
सनति विनिवेद्यैव, विरमति [signature]:

१३।१०।२०१४

चलदूरभाषः—
९८२९-२०४६-२८

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

7055
3.11.2013

विद्या–वैभव–भवन
29–केसर–विहार
जगतपुरा, जयपुर-302017 (राज.)
मो. 9799204628

दीपावली-पावन-पर्वकाले, सत्यव्रताः शास्त्रिवराः सुधीन्द्राः
समोद कान्ते भो भवतः प्रपूज्यान्, वन्दे मुदाऽहं सकुटुम्ब एव ॥
महार्घतायाः विकरालकाले, संजीवितुं मा कमला कृपालुः ।
पर्याप्तवित्तं धनधान्यराशिं, समस्तलोकाय ददातु सद्यः ॥
विकार्यतातो नहि कोऽपि दुःखी, तिष्ठेन्निराशश्च भवेन्नु जातु ।
लक्ष्मीर्मुदा तं वृणुयात् स्वयं हि, वाञ्छाम्यहं भोस्तोदितं सदैव ॥
सर्वोजनर्थान्त्यागतीर्हि सूते, हरि डैते नेति वदन्ति सर्वे ।
दारिद्र्यमस्मान्नहि कोऽपि जातु, लभेत लक्ष्मीमनुकम्पते वा शिभ ॥
एकत्र लक्ष्मीः स्वयमेव याति, परत्र सा याति न कार्येऽतोऽपि ।
वैषम्यमेतद् मम मानसं तु, दुनोति लक्ष्म्याः करवै किमत्र? ॥
सर्वोऽप्यनर्थो मनसः प्रदूषणाद्, भवन्ति किं जोति कृपा व्रतीशः ।
प्रदूषणो मुक्तमनो यथाहं, भवेत्तथा मा कमला करोतिः ॥
आतङ्कभीत्या नहि कोऽपि साम्प्रतं, सुखेन शेते धनिकोऽपि हन्त ।
आतङ्कमेतं प्रसृतं हि विश्वे, सद्यः समुन्मूलयतात् हरिप्रिया ॥
प्रशासनेनापि तथा हि शीघ्रं, नीतिः स्वकीया परिवर्तनीया ।
धनी यथा स्याद् धनिको धनेन, निःस्वोऽपि न स्याद्धनिकश्च निःस्वः ।
किं वाञ्छितं मे सफलं भविष्यति?, पुनः पुनः संशय एव जायते ।
दीपावलीषु यत ईदृशं पुरा, न वाञ्छितं मे फलितं कदाचन ॥
आशा न शक्या परमासि हातुं, यतो दुरन्तोऽस्ति सदेयमत्र ।
आशामतोऽहं विदधामि लक्ष्मीर्, वाञ्छामिमां पूरयिताधुना मे ॥
आरोग्यमायुर्लभतां सुदीर्घं, श्रीमाल को भो, सकुटुम्ब एव ।
... भवतां ... कश्चनाहम् ॥

Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan

आशास्महे चापि भवन्तु मान्याः! संस्कृतानां स्वीय-दयादृशां हि।
ततो भवन्तोऽविरतं सनीनै, निर्मान्तु साहित्यमिहोपकारि ॥
साहित्यमेवैकजनं सदैव, चिरायुषं रक्षति नूनमेव ।
निर्मात्यितस्तत्र प्रतिग्ध लब्धि, सुदूरदर्शी प्रथमं मनस्वी ॥
श्रीमत्सु किं वाऽति निवेद्यमत्र, स्वयं भवन्तो विविदन्ति सर्वम्।
सूर्यस्य दीपस्य प्रदर्शनं हि ॥
भवत्सुखे मे विनिवेदनं तु,
— प्रणमकम् —

जन्मस्थले केसरः, विहारे शिक्षा-वैभव-भवनेऽत्र।
भागत्पुराख्य-जयपुरे, निवासी भवत्कृपाकाङ्क्षी ॥
सुहार्दं निवेद्य भवति, सम्मानीयेऽद्य दीपावल्यां।
स्ववाचम् प्रस्तौति, प्रणमन् नरेश कौशिकः ॥

३।११।२०१३

प्र.मु./SPP/HYD - 2011 पोस्टकार्ड POSTCARD

परमपूज्य पद्मभूषण-
डॉ॰ श्रीयुत सत्यव्रत शास्त्री जी
सी २४७
डिफेंस कालोनी
नई दिल्ली

पिन PIN 1 1 0 0 2 4

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

भारत INDIA 50

Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan

ॐ 13-2013

सम्मान्याः सत्यव्रत शास्त्रीवर्याः

मान्या ऊषावर्या, परिवारस्य,

नमो नमः।

सद्भाववर्धनार्थम्,

सद्धर्मपालनार्थम्,

नात्यैव जीवनार्थम्,

संस्कार संस्कृतार्थम्,

राष्ट्रस्य गौरवार्थम्,

त्रैलोक्यमङ्गलार्थम्,

विश्वेऽपरे सुखार्थम्,

वर्षाभिवन्दनानि ॥---

इष्टप्रसादाद्

भवतात्प्रसादः ॥

—चन्द्रिकावासुदेवौ.

anaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gya

श्रीरामकीर्तिकाव्यम्
पठ्यते सादरम्
भक्तिभावत: ।
अभिवन्दनानि पुन: पुन: ।
वासुदेव:

प्रा. चन्द्रिका पाठक
डॉ. वासुदेव पाठक 'वागर्थ'
354, सरस्वतीनगर
अहमदाबाद- 15. गुजरात
फोन- 079 26745754

पोस्ट कार्ड POST CARD
प्र.मु./SPP/HYD - 2012

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

भारत INDIA 500 महात्मा गांधी

मान्यवर श्री.
डॉ. सत्यव्रत शास्त्रीजी
C-२५४,
डीफेन्स कॉलोनी
नई दिल्ली.

पिन PIN | 1 | 1 | 0 | 0 | | |

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

७४५०
२२.११.२०१५

॥ श्रीः पातु ॥

(१)

दीपावली-पर्वणि पूज्यपादाः!, समातृकाराः सकुटुम्ब एव।
नमामि सश्रद्धमहं भवद्भ्यः, शुभाशिषां राशिमवाप्तुमिच्छन् ॥

(२)

समाप्तकामाश्चापि भवन्त आर्याः!, शारीरिकं मानसिकं च सर्वम्।
स्वास्थ्यं वहन्तो मुदमाप्नुवन्तः, सुदीर्घमायुः सुधियः स्वदन्ताम् ॥

(३)

व्युच्छिद्य नृणां हृदयान्धकारं, सप्रेम सर्वान् मिथ आनयन्ती ।
प्रमोदयन्ती भृशमेव लोकं, दीपावलिर्मङ्गलमातनोतु ॥

(४)

महार्घता नश्यतु प्राण-हर्त्री, न भ्रूण-हत्या भवतात् कदापि ।
नातङ्कितं कोऽपि करोतु कञ्चित्, सर्वे प्रसन्नाः सुखिनः सदा स्युः ॥

(५)

बलात्कृतिः स्त्रीषु कदापि न स्याद्, जने जने ताः प्रति मातृ-भावः।
स्वसृ-स्नुषा-स्त्रीय-सुता-सुदृष्टिर्, जागर्तु लोकद्वय-साधिकाऽऽशु ॥

(६)

मनो विशुद्धं भवतात् समेषां, यतः प्रवर्त्येत न पाप-कृत्ये ।
मनो विशुद्धं भवतान्न तावद्, यावन्न पाठ्येत च संस्कृतं हि ॥

(७)

न कोऽपि कन्द्येत कदापि केन, कञ्चिन्न कश्चित् तुदतात् कदापि।
परस्परं प्रेम धरन् सदैव, सुखी समाजो भवतात् प्रसन्नः ॥

(८)

इत्यादिकाः सन्ति मदीय-कामनास्, तासां सकाशात् लघुमात्रकोऽत्र तु।
चर्चां कथं वै करवाणि कोविदाः!, कमप्युपायं न विलोकयामि हा! ॥

(९)

परन्तु किं तत् कलितं कदापि, यद् वच्मि प्रत्यब्दमहं तदित्थम् ।
उदेति प्रश्नो मम मानसेऽयं, यतोऽफलत् प्राङ् न मनोरथो मे ॥

(१०)

आशा न शक्याऽस्ति परं विहातुम्, आशाधृतो जीवति सर्वलोकः। ।
एतद् विचार्यैव मयापि तावद्, आशास्यतेऽग्रे सफलं निजेष्टम् ॥

(११)

संस्कृतयोग-विभूतिः, किं प्रदत्ता सर्वकाराय ? ।
कदा वा सर्वकारः, प्रकाशयिष्यति तामिति जिज्ञासे ॥

(१२)

स्थायि-लब्ध-सम्मानः, समासादितः श्रीमद्भिरिति ।
राजस्थान-पत्रिका, तो ज्ञात्वा मोमुद्यामहे वयम् ॥

(१३)

भूयान् समयोऽतीतः, श्रीमद्-दर्शनेभ्यः सपरिवारोऽहम्।
वञ्चितोऽस्मीति साम्प्रतं, कदा दर्शन-दानैरनुग्रहीष्यन्ति? ॥

(१४)

आशासे चास्मदीय-पूज्य-मातृचरणाः स्वस्थाः प्रसन्नाश्च ।
तत्-पादाब्जयोश्चापि, कृपयाऽस्मन्नति-ततयो निवेदनीयाः॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

सेवा में
श्रीयुत परमश्रद्धेय
प्रो० डॉ० सत्यव्रत शास्त्री जी
सी. 248,
डिफैंस कालोनी,
नई दिल्ली

पिन PIN 110024

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

दूसरा मोड़ SECOND FOLD

इस पत्र के अन्दर कुछ न रखें NO ENCLOSURES ALLOWED

पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS

प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

पिन PIN

PHILATELY: KING OF HOBBIES
CONTACT:
Nearest Philatelic Bureau
COLLECT
INDIA POSTAGE STAMPS

यहाँ काट कर खोलिए TO OPEN CU

यहाँ काट कर खोलिए TO OPEN CUT HERE

— युग्मकम् —

ऊनत्रिंशे केसरे, विहारे विद्या-वैभव-भवनेऽत्र ।
जगत्पुराख्य-जयपुरे, वासी कोविद-कुल-किङ्करः ।।
स्वकीयमेवं हार्दं, निवेदयाम्यस्तु सप्रश्रयम् ।
मान्याः! प्रणमन्निहैव, विरमति [illegible] किङ्करः ।।

11.11.2015

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

C-248, DEFENCE COLONY,
NEW DELHI-110024.
10. XI. 2008.

Tel. (011) 24336644
24336631

(M) 09968211148

मान्या विद्वद्वर्याः, सप्रणामं प्रणताः स्मः।

दीपावलिशुभाशंसा भवद्भिः प्रेषिता मयि।
प्रेमानन्दसन्दोहं मम चित्ते व्यजीजनत् ॥१॥
दीपपर्व शुभं भूयात् कृतेऽपि भवतामिदम्।
इत्थं हे प्रार्थये प्रह्वः शङ्करं लोकशङ्करम् ॥२॥
नाना ग्रन्थ प्रकाशने ~~[illegible]~~ व्याकुलोऽहमहर्निशम्।
नामयामि स्वकं कालं विशदेनान्तरात्मना ॥३॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

Tel. (011) 24336644
24336631

(M) 09968211148

C-248, DEFENCE COLONY,
NEW DELHI-110024.

10. XI. 2008.

मान्या विद्वद्वर्याः, सप्रणामं प्रणतयः।

दीपावलिशुभाशंसा भवद्भिः प्रेषिता मयि।
अमन्दानन्दसन्दोहं मम चित्ते व्यजीजनत्॥१॥
दीपपर्व शुभं भूयात् हृतेऽपि सकलार्तिदम्।
इत्थं हे प्रार्थये नित्यं शङ्करं लोकशङ्करम्॥२॥
नानाग्रन्थप्रणयने व्यापृतोऽहमहर्निशम्।
गमयामि स्वकं कालं विशदेनान्तरात्मना॥३॥

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

एकोनाशीति वर्षोऽहं
न मे कार्यान्तरे स्पृहा।
सरस्वतीपदाम्भोज-
स्मरणं जीवितं मम॥४॥
शास्त्राण्यनन्तपाराणि
तद्रहस्यं न वेद कः।
एकैकस्मिन्नपि स्फुटः सत्यं
नाना जन्मानि तत्कृते॥५॥
तथाऽपि तत्कृते यत्नः
सततं क्रियतामिति।
तत्र बाधा स्वयमेव
मन्यते प्रियतरं मम॥६॥
इति स्वाभाविकं वचः
भवत्स्नेहवशंवदस्य सत्यव्रतशास्त्रिणः॥

POST CARD पोस्ट कार्ड

प्र.मु./S.P.P., HYD.-2007

Philately: King Of Hobbies
COLLECT INDIA POSTAGE STAMPS
CONTACT Nearest Philatelic Bureau

डा० उमाकान्त शुक्ल,
ब्रह्मानन्द नीड, प्रियंवदा वाटिका,
604, संजय मार्ग, पटेल नगर
मुजफ्फर नगर

पिन PIN 2 5 1 0 0 1

(इस लाइन के नीचे न तो लिखें और न ही मुद्रित करें Do not write or print below this line)

MUZAFFARNAGAR

(U.P.)

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

Mahamahopadhyaya Vidyavachaspati Vidyamartanda
Prof. Dr. Satya Vrat Shastri`

Recipient of Padma Shri & president of India Certificate of Honour
Honorary Professor, Special Centre for Sanskrit Studies
Jawaharlal Nehru University
Formerly Professor and Head, Department of Sanskrit
University of Delhi
Ex-Vice-Chancellor,
Shri Jagannath Sanskrit University, Puri (Orissa)

Res. : C-248, Defence Colony,
New Delhi-110 024
E-mail : satyavratshastri@airtelbroadband.in
Website : satyavrat-shastri.net
Ph. : 24336644, 24336631

12.XI.2007.

डा० प्रकाशपाण्डेयमहाभागाः
नवदिल्लीस्थ राष्ट्रिय संस्कृत संस्थान सहायकनिदेशकाः,
जनकपुरी,
नई दिल्ली-110058.

मान्याः, जयतु भारती।

अध्यगामि मया काव्यमृतुवर्णननामकम्।
पठित्वाऽऽमूलचूलं च सूक्ष्मदृष्ट्या निरीक्षितम्॥१॥
सा चेयं कृतिः सत्यं प्रकाशनमपेक्षते।
सम्पादकप्रयासोऽयं श्लाघनीयोऽस्ति वस्तुतः॥२॥
टङ्कणस्थप्रमादास्तु बहवो हि क्वचिद् दृष्टाः।
बहुशः प्रविलोक्यन्ते शोध्यास्ते प्रयत्नतः॥३॥
प्रकाशनानुदानार्थमेतन्निर्देशपूर्वकम्।
अनुशंसाऽस्य काव्यस्य सहर्षं क्रियते मया॥४॥

इति निवेदना
सत्यव्रतशास्त्रिणः

CC-O. Nanaji Deshmukh Library, BJP, Jammu. Digitised By Siddhanta eGangotri Gyaan Kosha

Tel. (011) 24336644
24336631
(M) 09968211148

C-248, DEFENCE COLONY,
NEW DELHI-110024.

10. XI. 2008.

मान्या विद्वद्वर्याः

सप्रणामं प्रणतयः ।

दीपाञ्जलिशुभाशंसा भवद्भिः प्रेषिता मयि ।
प्रेमानन्दानन्दसन्दोहं मम चित्ते व्यजीजनत् ॥१॥
दीपपर्वशुभं मूल्यं हृतेऽपि भवता किमिदम् ।
इत्थं हि ह्यर्पये प्रह्वः शङ्करं लोकशङ्करम् ॥२॥
नानाग्रन्थप्रणयने ~~सर्वतो~~ व्यापृतोऽहमहर्निशम् ।
यापयामि स्वकं कालं विशदेनान्तरात्मना ॥३॥

